**नमो नमो निम्मलदंसणस्स**

पूज्य श्रीआनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नमः

# “महाप्रत्याख्यान” मूलं एवं छाया

**[मूलं एवं संस्कृतछाया]**

[आद्य संपादकः - पूज्य आगमोद्धारक आचार्यदेव श्री आनंदसागर सूरीश्वरजी म. सा. ]

(किञ्चित् वैशिष्ठ्यं समर्पितेन सह)

पुनः संकलनकर्ता→ मुनि दीपरत्नसागर **(M.Com., M.Ed., Ph.D.)**

15/01/2015, गुरुवार, २०७१ पौष कृष्ण १०

jain_e_library's Net Publications

| आगम (२६) | “महाप्रत्याख्यान” - प्रकीर्णकसूत्र-३ (मूलं+संस्कृतछाया)<br>-------------------------------------- मूलं [--] -------------------------------------- |
|---|---|
| प्रत सूत्रांक [--]<br><br>दीप अनुक्रम [--] | मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] “महाप्रत्याख्यान” मूलं एवं संस्कृतछाया |
| | महाप्रत्याख्यान-प्रकीर्णकसूत्रस्य मूल “टाइटल पेज” |

‘महाप्रत्याख्यान प्रकीर्णक(३)


श्रीआगमोदयसमितिग्रन्थोद्धारे, पूर्वमुद्रितग्रन्थाङ्कः–४५, अयं–ग्रन्थाङ्कः–४६.

श्रुतस्थविरसूत्रितं ।

चतुःशरणादिमरणसमाध्यन्तं प्रकीर्णकदशकं (छायायुतम्) ।

प्रकाशकः—श्रीआगमोदयसमितेः कार्यवाहकः झवेरी–वेणीचंद सूरचंद ।

इदं पुस्तकं मोहमय्यां निर्णयसागरमुद्रणालये कोलभाटवीथ्यां–२६–२८ तमे गृहे
रामचंद्र येसू शेडगेद्वारा मुद्रापयित्वा प्रकाशितम् ।

वीर सं० २४५३. विक्रम सं० १९८३. सन १९२७. [ वेतनं रू. २–०–०.

| मूलांक: | गाथा | पृष्ठांक: | | मूलांक: | गाथा | पृष्ठांक: | | मूलांक: | गाथा | पृष्ठांक: |
|---|---|---|---|---|---|---|---|---|---|---|
| ००१ | मङ्गलं | ००४ | | ००३ | व्युत्सर्जन, क्षमापनादि | ००४ | | ००८ | निन्दा-गर्हा आदि | ००५ |
| ०१३ | भावना | ००५ | | ०१८ | मिथ्यात्वत्याग, आलोचनादि | ००६ | | ०३७-१४२ | विविधं धर्मोपदेशादि | ००९ |

## ['महाप्रत्याख्यान' - मूलं एवं संस्कृतछाया] इस प्रकाशन की विकास-गाथा

यह प्रत सबसे पहले "चतु:शरणादिमरणसमाध्यन्तं प्रकीर्णकदशकं" नामसे सन १९२७ (विक्रम संवत १९८३) में आगमोदय समिति द्वारा प्रकाशित हुई, संपादक-महोदय थे पूज्यपाद आगमोद्धारक आचार्यदेव श्री आनंदसागरसूरीश्वरजी (सागरानंदसूरिजी) महाराज साहेब | इस प्रतमे १० प्रकीर्णक थे.

इसी प्रत को फिर से दुसरे पूज्यश्रीओने अपने-अपने नामसे भी छपवाई, जिसमे उन्होंने खुदने तो कुछ नहीं किया, मगर इसी प्रत को ऑफसेट करवा के, अपना एवं अपनी प्रकाशन संस्था का नाम छाप दिया. जिसमे किसीने पूज्यपाद् सागरानंदसूरिजी के नाम को आगे रखा, और अपनी वफादारी दिखाई, तो किसीने स्वयं को ही इस पुरे कार्य का कर्ता बता दिया और संपादकपूज्यश्री तथा प्रकाशक का नाम ही मिटा दिया |

✣ **हमारा ये प्रयास क्यों?** ✣ आगम की सेवा करने के हमें तो बहोत अवसर मिले, **४५-आगम सटीक** भी हमने ३० भागोमे १२५०० से ज्यादा पृष्ठोमें प्रकाशित करवाए है किन्तु लोगो की पूज्य श्री सागरानंदसूरीश्वरजी के प्रति श्रद्धा तथा प्रत स्वरुप प्राचीन प्रथा का आदर देखकर हमने इसी प्रत को स्केन करवाई, उसके बाद एक **स्पेशियल फोरमेट** बनवाया, जिसमे बीचमे पूज्यश्री संपादित प्रत ज्यों की त्यों रख दी, ऊपर **शीर्षस्थानमे** आगम का नाम, फिर मूलसूत्र या गाथा के क्रमांक लिख दिए, ताँकि पढ़नेवाले को प्रत्येक पेज पर कौनसा सूत्र या गाथा चल रहे है उसका सरलता से ज्ञान हो शके, बायीं तरफ **आगम** का **क्रम** और इसी **प्रत** का **सूत्रक्रम** दिया है, उसके साथ वहाँ **'दीप अनुक्रम'** भी दिया है, जिससे हमारे प्राकृत, संस्कृत, हिंदी गुजराती, इंग्लिश आदि सभी आगम प्रकाशनोमें प्रवेश कर शके | हमारे अनुक्रम तो प्रत्येक प्रकाशनोमें एक सामान और क्रमशः आगे बढते हुए ही है, इसीलिए सिर्फ क्रम नंबर दिए है, मगर प्रत में गाथा और सूत्रो के नंबर अलग-अलग होने से हमने जहां सूत्र है वहाँ **कौंस [-]** दिए है और जहां गाथा है वहाँ **||-||** ऐसी **दो लाइन** खींची है या फिर गाथा शब्द लिख दिया है |

हमने एक अनुक्रमणिका भी बनायी है, जिसमे प्रत्येक अध्ययन आदि लिख दिये है और साथमें इस सम्पादन के पृष्ठांक भी दे दिए है, जिससे अभ्यासक व्यक्ति अपने चहिते अध्ययन या विषय तक आसानी से पहुँच शकता है | अनेक पृष्ठ के नीचे **विशिष्ठ फूटनोट** भी लिखी है, जहां उस पृष्ठ पर चल रहे ख़ास विषयवस्तु की, मूल प्रतमें रही हुई कोई-कोई मुद्रण-भूल की या क्रमांकन-भूल सम्बन्धी जानकारी प्राप्त होती है |

अभी तो ये jain_e_library.org का 'इंटरनेट पब्लिकेशन' है, क्योंकि विश्वभरमें अनेक लोगो तक पहुँचने का यहीं सरल, सस्ता और आधुनिक रास्ता है, आगे जाकर ईसि को मुद्रण करवाने की हमारी मनीषा है|

**......मुनि दीपरत्नसागर.....**

मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] “महाप्रत्याख्यान” मूलं एवं संस्कृतछाया

प्रत
सूत्रांक
||१||

दीप
अनुक्रम
[१]

३ महाप्र-
त्याख्यानं

॥ १० ॥

मंगलादि

॥ अथ महाप्रत्याख्यानप्रकीर्णकम् ॥ ३ ॥

एस करेमि पणामं तित्थयराणं अणुत्तरगईणं । सवेसिं च जिणाणं सिद्धाणं संजयाणं च ॥ १ ॥ १३४ ॥ सवदुक्खप्पहीणाणं, सिद्धाणं अरहओ नमो । सद्दहे जिणपन्नत्तं, पच्चक्खामि य पावगं ॥ २ ॥ १३५ ॥ जं किंचिवि दुच्चरियं तमहं निंदामि सवभावेणं । सामाइयं च तिविहं करेमि सवं निरागारं ॥ ३ ॥ १३६ ॥ बाहिरब्भंतरं उवहिं, सरीरादि सभोअणं । मणसा वयकाएणं, सवं तिविहेण वोसिरे ॥४॥ १३७ ॥ रागबंधं पओसं

अथ महाप्रत्याख्यानम् ॥३॥ एष करोमि प्रणामं तीर्थकरेभ्योऽनुत्तरगतिभ्यः । सर्वेभ्यश्च जिनेभ्यः सिद्धेभ्यः संयतेभ्यश्च ॥१॥ प्रक्षीणसर्वदुःखेभ्यः सिद्धेभ्योऽर्हद्भ्यो नमः। श्रद्दधे जिनप्रज्ञप्तं प्रत्याख्यामि च पापकम्॥२॥ यत्किञ्चिद् दुश्चरितं तदहं निन्दामि सर्वभावेन। सामायिकं च त्रिविधं करोमि सर्वं निराकारम् ॥३॥ बाह्यमभ्यन्तरमुपधिं शरीरादि सभोजनम्। मनोवाक्कायेन सर्वं त्रिविधेन व्युत्सृजामि ॥४॥ रागबन्धं

॥ १० ॥

Jain Education International
For Personal & Private Use Only
www.jainelibrary.org

अरहंत-सिद्ध-वंदना, अथ व्युत्सर्जन(परित्याग), क्षमापनादि वर्णयते

प्रत
सूत्रांक
||५||

दीप
अनुक्रम
[५]

च, हरिसं दीणभावयं। उस्सुअत्तं भयं सोगं, रइमरइं च वोसिरे ॥ ५ ॥ १३८ ॥ रोसेण पडिनिवेसेणं अक-यण्णुयाए तहेवऽसज्झाए। जो मे किंचिवि भणिओ तमहं (तिविहं) तिविहेण खामेमि ॥ ६ ॥ १३९ ॥ खामेमि सव्वजीवे, सव्वे जीवा खमंतु मे। आसाओ (आसवे) वोसिरित्ताणं, समाहिं पडिसंधए ॥७॥ १४० ॥ निंदामि निंदणिज्जं गरिहामि य जं च मे गरहणिज्जं । आलोएमि य सव्वं जिणेहिं जं जं च पडिसिद्धं (कुट्ठं) ॥ ८ ॥ १४१ ॥ उवही सरीरगं चेव, आहारं च चउव्विहं । ममत्तं सव्वदव्वेसु, परिजाणामि केवलं ॥९॥१४२॥ ममत्तं परिजाणामि, निम्ममत्ते उवट्ठिओ। आलंबणं च मे आया, अवसेसं च वोसिरे ॥१०॥ १४३ ॥ आया मे जं नाणे आया मे दंसणे चरित्ते य। आया पच्चक्खाणे आया मे संजमे जोगे ॥ ११ ॥ १४४ ॥ मूलगुणे उत्तरगुणे जे मे नाराहिया पमाएणं । ते सव्वे निंदामि पडिक्कमे आगमिस्साणं ॥ १२ ॥ १४५ ॥ इक्कोऽहं

---

प्रद्वेषं च हर्षं दीनभावताम् । उत्सुकत्वं भयं शोकं रतिमरतिं च व्युत्सृजामि ॥५॥ रोषेण प्रतिनिवेशेन अकृतज्ञतया तथैवासद्ध्यानेन यन्मया किञ्चिदपि भणितं तदहं (त्रिविधं)त्रिविधेन क्षाम्यामि ॥६॥ क्षाम्यामि सर्वजीवान् सर्वे जीवाः क्षाम्यन्तु मयि । आशा ( आश्रवान् ) व्युत्सृज्य समाधिं प्रतिसंदधे ॥७॥ निन्दामि निन्दनीयं गर्हे च यच्च मे गर्हणीयम् । आलोचयामि च सर्वं जिनैर्यद् यच्च प्रतिषिद्धम् (कुष्टं) ॥८॥ उपधिं शरीरमेव आहारं च चतुर्विधम्। ममत्वं सर्वद्रव्येषु परिजानामि केवलम् ॥९॥ ममत्वं परिजानामि निर्ममत्वे उपस्थितः । आलम्बनं च मे आत्मा अवशेषं च व्युत्सृजामि ॥ १० ॥ यन्मे ज्ञानमात्मा आत्मा मे दर्शनं चारित्रं च । आत्मा प्रत्याख्यानं आत्मा मे संयमो योगश्च ॥ ११ ॥ मूलगुणा उत्तरगुणाश्च ये मया नाराधिताः प्रमादेन। तान् सर्वान् निन्दामि प्रतिक्राम्याम्यागमिष्यताम् ॥ १२ ॥ एकोऽहं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ वैराग्य-भावना निर्दिश्यते

मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] "महाप्रत्याख्यान" मूलं एवं संस्कृतछाया

प्रत सूत्रांक ||१३||

दीप अनुक्रम [१३]

२ महाप्रत्याख्यानं ॥ ११ ॥

त्यागभावनादि

नत्थि मे कोई, न चाहमवि कस्सई। एवं अदीणमणसो, अप्पाणमणुसासए ॥ १३ ॥ १४६ ॥ इक्को उप्पज्जए जीवो, इक्को चेव विवज्जई। इक्कस्स होइ मरणं, इक्को सिज्झइ नीरओ ॥ १४ ॥ १४७ ॥ एक्को करेइ कम्मं फलमवि तस्सिक्कओ समणुहवइ । इक्को जायइ मरइ परलोअं इक्कओ जाइ ॥ १५ ॥ १४८ ॥ इक्को मे सासओ अप्पा, नाणदंसणसंजुओ (लक्खणो)। सेसा मे बाहिरा भावा, सव्वे संजोगलक्खणा ॥ १६ ॥ १४९ ॥ संजोगमूला जीवेणं, पत्ता दुक्खपरंपरा। तम्हा संजोगसंबंधं, सव्वं तिविहेण वोसिरे ॥ १७ ॥ १५० ॥ अस्संजममण्णाणं मिच्छत्तं सव्वओऽवि अ ममत्तं। जीवेसु अजीवेसु य तं निंदे तं च गरिहामि ॥ १८ ॥ १५१ ॥ मिच्छत्तं परिजाणामि सव्वं अस्संजमं अलीयं च। सव्वत्तो अ ममत्तं चयामि सव्वं खमावेमि (च खामेमि) ॥ १९ ॥ १५२ ॥ जे मे जाणंति जिणा अवराहा जेसु जेसु ठाणेसु। तं तह आलोएमी उवट्ठिओ सव्वभावेणं

नास्ति मे कश्चित् न चाहमपि कस्यचित्। एवमदीनमना आत्मानमनुशास्मि ॥ १३ ॥ एक उत्पद्यते जीव एकश्चैव विपद्यते। एकस्य भवति मरणं एकः सिद्ध्यति नीरजाः ॥ १४ ॥ एकः करोति कर्म फलमपि तस्यैककः समनुभवति। एको जायते म्रियते परलोकमेकको याति ॥ १५ ॥ एको मे शाश्वत आत्मा ज्ञानदर्शनसंयुतः (लक्षणः)। शेषा मे बाह्या भावाः सर्वे संयोगलक्षणाः ॥ १६ ॥ संयोगमूला जीवेन प्राप्ता दुःखपरम्परा। तस्मात्संयोगसम्बन्धं सर्वं त्रिविधेन व्युत्सृजामि ॥ १७ ॥ असंयममज्ञानं मिथ्यात्वं सर्वतोऽपि च ममत्वम्। जीवेष्वजीवेषु च तन्निन्दामि तच्च गर्हे ॥ १८ ॥ मिथ्यात्वं परिजानामि सर्वमसंयममलीकं च। सर्वतश्च ममत्वं त्यजामि सर्वं च क्षमयामि (क्षाम्यामि) ॥ १९ ॥ यान् मे जानन्ति जिना अपराधान् येषु येषु स्थानेषु। तांस्तथाऽऽलोचयामि, उपस्थितः सर्वभावेन ॥ २० ॥ उत्प- ॥ ११ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वआलोचना-निन्दणा-गर्हा आदि प्रदर्श्यते

प्रत
सूत्रांक
||२१||

दीप
अनुक्रम
[२१]

॥ २० ॥ १५३ ॥ उप्पन्नाणुप्पन्ना माया अणुमग्गओ निहंतव्वा । आलोयणनिंदणगरिहणाहिं न पुणत्ति या बीयं ॥ २१ ॥ १५४ ॥ जह बालो जंपन्तो कज्जमकज्जं च उज्जुयं भणइ । तं तह आलोइज्जा मायामयविप्पमुक्को उ ॥ २२ ॥ १५५ ॥ सोही उज्जुयभूयस्स, धम्मो सुद्धस्स चिट्ठई । निव्वाणं परमं जाइ, घयसित्तुव्व पावए ॥ २३ ॥ १५६ ॥ न हु सिज्झई ससल्लो जह भणियं सासणे धुयरयाणं । उद्धरियसव्वसल्लो सिज्झइ जीवो धुअकिलेसो ॥ २४ ॥ १५७ ॥ सुबहुंपि भावसल्लं आलोएऊण (जे आलोयंति) गुरुसगासंमि । निस्सल्ला संथारगमुविंति आराहगा हुंति ॥ २५ ॥ १५८ ॥ अप्पंपि भावसल्लं जे नालोयंति गुरुसगासंमि । घंतंपि सुयसमिद्धा न हु ते आराहगा हुंति ॥ २६ ॥ १५९ ॥ नवि तं सत्थं च विसं च दुप्पउत्तो व कुणइ वेयालो । जंतं व दुप्पउत्तं सप्पुव्व पमायओ कुद्धो ॥ २७ ॥ १६० ॥ जं कुणइ भावसल्लं अणुद्धियं उत्तमट्ठकालंमि ।

---

त्राऽनुत्पन्ना मायाऽनुमार्गतो निहन्तव्या । आलोचननिन्दनगर्हाभिर्न पुनरिति च द्वितीयम् ॥ २१ ॥ यथा बालो जल्पन् कार्यमकार्यं च ऋजुकं भणति । तत्तथाऽऽलोचयेन्मायामदविप्रमुक्त एव ॥ २२ ॥ शुद्धिः ऋजुभूतस्य धर्मः शुद्धस्य तिष्ठति । निर्वाणं परमं याति घृतसिक्त इव पावकः ॥ २३ ॥ नैव सिद्ध्यति सशल्यो यथा भणितं शासने धुतरजसाम् । उद्धृतसर्वशल्यः सिद्ध्यति जीवो धुतक्लेशः ॥२४॥ सुबह्वपि भावशल्यमालोच्य(चयन्ति)गुरुसकाशे । निःशल्याः संस्तारकमुपयान्त्याराधका भवन्ति ॥ २५ ॥ अल्पमपि भावशल्यं ये नालोचयन्ति गुरुसकाशे । बाढमपि श्रुतसमृद्धा नैव ते आराधका भवन्ति ॥ २६ ॥ नैव तच्छस्त्रं च विषं च दुष्प्रयुक्तो वा करोति वैतालः । यन्त्रं च दुष्प्रयुक्तं सर्पो वा प्रमादतः क्रुद्धः ॥ २७ ॥ यत्करोति भावशल्यमनुद्धृतमुत्तमार्थकाले । दुर्लभबोधिकत्वमनन्तसंसारिकत्वं च ॥ २८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भावशल्यानां वर्णनं क्रियते

प्रत
सूत्रांक
||२८||

दीप
अनुक्रम
[२८]

२ महाप्र-
त्याख्यानं

॥ १२ ॥

दुल्लंभबोहियत्तं अणंतसंसारियत्तं च ॥ २८ ॥१६१॥ तो उद्धरंति गारवरहिया मूलं पुणब्भवलयाणं। मिच्छा-
दंसणसल्लं मायासल्लं नियाणं च ॥ २९ ॥ १६२ ॥ कयपावोऽवि मणूसो आलोइय निंदिओ (निन्दिय)
गुरुसगासे। होइ अइरेगलहुओ ओहरियभरुव्व भारवहो ॥ ३० ॥ १६३ ॥ तस्स य पायच्छित्तं जं मग्गविऊ
गुरू उवइसंति (वइस्संति)। तं तह अणुसरियव्वं अणवत्थपसंगभीएणं ॥ ३१ ॥ १६४ ॥ दसदोसविप्पमुक्कं
तम्हा सव्वं अगूहमाणेणं। जं किंपि कयमकज्जं तं जहवत्तं कहेयव्वं ॥ ३२ ॥ १६५ ॥ सव्वं पाणारंभं पच्चक्खामि
य अलियवयणं च। सव्वमदिन्नादाणं अब्बंभपरिग्गहं चेव ॥ ३३ ॥ १६६ ॥ सव्वंपि असणपाणं चउव्विहं जो
अ बाहिरो उवही। अब्भिंतरं च उवहिं सव्वं तिविहेण वोसिरे ॥ ३४ ॥ १६७ ॥ कंतारे दुब्भिक्खे आयंके व
महया समुप्पन्ने। जं पालियं न भग्गं तं जाणसु पालणासुद्धं ॥ ३५ ॥ १६८ ॥ रागेण व दोसेण व परिणामे

मायाहन-
नादि

तत उद्धरन्ति गौरवरहिता मूलं पुनर्भवलतानाम्। मिथ्यादर्शनशल्यं मायाशल्यं निदानशल्यं च ॥ २९ ॥ कृतपापोऽपि मनुष्य आलोचित-
निन्दितः (आलोच्य निन्दित्वा) गुरुसकाशे। भवत्यतिरेकलघुः उत्तारितभर इव भारवाट् ॥ ३० ॥ तस्य च प्रायश्चित्तं यन्मार्गविदो
गुरव उपदिशन्ति (०वो वदिष्यन्ति)। तत्तथाऽनुसर्त्तव्यमनवस्थाप्रसङ्गभीतेन ॥ ३१ ॥ दशदोषविप्रमुक्तं तस्मात्सर्वमगूहमानेन। यत्किमपि
कृतमकार्यं तद् यथावृत्तं कथयितव्यम् ॥ ३२ ॥ सर्वं प्राणारम्भं प्रत्याख्यामि चालीकवचनं च। सर्वमदत्तादानमब्रह्म परिग्रहं चैव
॥ ३३ ॥ सर्वमप्यशनं पानं चतुर्विधं यश्च बाह्य उपधिः(तं)। अभ्यन्तरं चोपधिं सर्वं त्रिविधेन व्युत्सृजामि ॥ ३४ ॥ कान्तारे दुर्भिक्षे ॥ १२ ॥
आतङ्के वा महति समुत्पन्ने। यत्पालितं न भग्नं तत् (प्रत्याख्यानं) जानीहि पालनाशुद्धम् ॥ ३५ ॥ रागेण वा दोषेण वा परिणामेन वा न

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||३६||

दीप अनुक्रम [३६]



ण व न दूसियं जं तु । तं खलु पच्चक्खाणं भावविसुद्धं मुणेयव्वं ॥ ३६ ॥ १६९ ॥ पीयं थणअच्छीरं सागरस-
लिलाउ बहुतरं हुज्जा । संसारंमि अणंते माईणं अन्नमन्नाणं ॥ ३७ ॥ १७० ॥ बहुसोऽवि मए रुण्णं पुणो पुणो
तासु तासु जाईसु । नयणोदयंपि जाणसु बहुययरं सागरजलाओ ॥ ३८ ॥ १७१ ॥ नत्थि किर सो पएसो
लोए वालग्गकोडिमित्तोऽवि । संसारे संसरंतो जत्थ न जाओ मओ वावि ॥ ३९ ॥ १७२ ॥ चुलसीई किल
लोए जोणी पमुहाइं (जोणीणं पमुह०) सयसहस्साइं । इक्किक्कंमि य इत्तो अणंतखुत्तो समुप्पन्नो ॥ ४० ॥ १७३ ॥
उड्ढमहे तिरियंमि य मयाइं बहुयाइं बालमरणाइं । तो ताइं संभरंतो पंडियमरणं मरीहामि ॥ ४१ ॥ १७४ ॥
माया मित्ति पिया मे भाया भगिणी य पुत्त धूया य । एयाइं संभरंतो पंडियमरणं मरीहामि ॥ ४२ ॥ १७५ ॥
मायापिइबंधूहिं संसारत्थेहिं पूरिओ लोगो । बहुजोणिवासिएहिं न य ते ताणं च सरणं च ॥४३॥१७६॥ इक्को

दूषितं यत्तु । तत्खलु प्रत्याख्यानं भावविशुद्धं ज्ञातव्यम् ॥ ३६ ॥ पीतं स्तनक्षीरं सागरसलिलाद् बहुतरं भवेत् । संसारेऽनन्ते मातॄणा-
मन्यान्यासाम् ॥ ३७ ॥ बहुशोऽपि मया रुदितं पुनः पुनस्तासु तासु जातिषु । (तत्र) नयनोदकमपि जानीहि बहुतरं सागरजलात् ॥ ३८ ॥
नास्ति किल स प्रदेशो लोके वालाग्रकोटीमात्रोऽपि । संसारे संसरन् यत्र न जातो न मृतो वाऽपि ॥३९॥ चतुरशीतिः किल लोके योनि-
प्रमुखाणि शतसहस्राणि । एकैकस्मिँश्चेतोऽनन्तकृत्वः समुत्पन्नः ॥ ४० ॥ ऊर्द्धमधस्तिरश्चि च मृतानि बहुकानि बालमरणानि । ततस्तानि
स्मरन् पण्डितमरणं मरिष्ये ॥ ४१ ॥ माता मे इति पिता मे भ्राता भगिनी च पुत्रा दुहितरश्च । एतानि (अनन्तानि) स्मरन् पण्डितमरणं
च. स. ३ मरिष्ये ॥ ४२ ॥ मातापितृबन्धुभिः संसारस्थैः पूरितो लोकः । बहुयोनिनिवासिभिर्न च ते त्राणं च शरणं च ॥ ४३ ॥ एकः करोति कर्म

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ पंडितमरणेच्छाया: अभिव्यक्ति क्रियते

मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] "महाप्रत्याख्यान" मूलं एवं संस्कृतछाया

प्रत
सूत्रांक
||४४||

दीप
अनुक्रम
[४४]

२ आतुरप्रत्याख्याने
॥ १३ ॥

करेइ कम्मं इक्को अणुहवइ दुक्कयविवागं। इक्को संसरइ जिओ जरमरणचउग्गईगुविलं ॥ ४४ ॥ १७७ ॥
उव्वेयणयं जम्मणमरणं नरएसु वेयणाओ वा । एयाइं संभरंतो पंडियमरणं मरीहामि ॥ ४५ ॥ १७८ ॥
उव्वेयणयं जम्मणमरणं तिरिएसु वेयणाओ वा। एयाइं संभरंतो पंडियमरणं मरीहामि ॥ ४६ ॥ १७९ ॥
उव्वेयणयं जम्मणमरणं मणुएसु वेयणाओ वा। एयाइं संभरंतो पंडियमरणं मरीहामि ॥ ४७ ॥ १८० ॥ उव्वेयणयं जम्मणमरणं चवणं च देवलोगाओ । एयाइं संभरंतो पंडियमरणं मरीहामि ॥ ४८ ॥ १८१ ॥ इक्कं पंडियमरणं छिंदइ जाईसयाइं बहुआइं। तं मरणं मरियव्वं जेण मओ सम्मओ होइ ॥ ४९ ॥ १८२ ॥ कइया णु तं सुमरणं पंडियमरणं जिणेहिं पन्नत्तं। सुद्धो उद्धियसल्लो पाओवगओ मरीहामि? ॥ ५० ॥ १८३ ॥ भवसंसारे सव्वे चउव्विहा पुग्गला मए बद्धा । परिणामपसंगेणं अट्ठविहे कम्मसंघाए ॥ ५१ ॥ १८४ ॥ संसारचक्कवाले सव्वे ते पुग्गला मए बहुसो । आहारिया य परिणामिया य नयऽहं गओ तित्तिं ॥ ५२ ॥ १८५ ॥

एकोऽनुभवति दुष्कृतविपाकम् । एकः संसरति जीवो जरामरणचतुर्गतिगुपिलम् (भवं) ॥ ४४ ॥ उद्वेजकं जन्ममरणं नरकेषु वेदनाश्च । एताः स्मरन् पण्डितमरणं मरिष्ये ॥ ४५ ॥ उद्वेजकं० तिर्यक्षु वेदनाश्च० ॥ ४६ ॥ उद्वेजकं०। मनुजेषु० ॥ ४७ ॥ उद्वेजकं० । च्यवनं च देवलोकात्० ॥ ४८ ॥ एकं पण्डितमरणं छिनत्ति जातिशतानि बहुकानि । तन्मरणं मर्त्तव्यं येन मृतः सन् मृतो भवति ॥ ४९ ॥ कदा तत् सुमरणं पण्डितमरणं जिनैः प्रज्ञप्तम् । शुद्ध उद्धृतशल्यः पादपोपगतो मरिष्ये? ॥५०॥ भवसंसारे सर्वे चतुर्विधाः पुद्गला मया बद्धाः । परिणामप्रसङ्गेन अष्टविधे कर्मसङ्घाते ॥ ५१ ॥ संसारचक्रवाले सर्वे ते पुद्गला मया बहुशः । आहारिताश्च परिणामिताश्च न चाहं गत-

पंडितमरणेच्छा पुद्गलैरतृप्तिः
३६-५२

॥ १३ ॥

Jain Education International    For Personal & Private Use Only    www.jainelibrary.org

अथ आहार-आदि पुद्गलैः अतृप्तिः

प्रत
सूत्रांक
||५३||

दीप
अनुक्रम
[५३]

आहारनिमित्तेणं अहयं सव्वेसु नरयलोएसु । उववण्णोमि य बहुसो सव्वासु य मिच्छजाईसु ॥ ५३ ॥ १८६ ॥
आहारनिमित्तेणं मच्छा गच्छंति दारुणे नरए । सच्चित्तो आहारो न खमो मणसावि पत्थेउं ॥ ५४ ॥१८७॥
तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं । न इमो जीवो सक्को तिप्पेउं कामभोगेहिं ॥५५॥ १८८ ॥
तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं । न इमो जीवो सक्को तिप्पेउं अत्थसारेणं ॥ ५६ ॥ १८९ ॥
तणकट्ठेण व अग्गी लवणजलो वा नईसहस्सेहिं । न इमो जीवो सक्को तिप्पेउं भोअणविहीए ॥५७॥ १९०॥
वलयामुहसामाणो दुप्पारो व णरओ अपरिमिज्जो । न इमो जीवो सक्को तप्पेउं गंधमल्लेहिं ॥ ५८ ॥ १९१ ॥
अवियद्धोऽ(अवितत्तो)यं जीवो अईयकालम्मि आगमिस्साए । सद्दाण य रूवाण य गंधाण रसाण फासाणं
॥ ५९ ॥ १९२ ॥ कप्पतरुसंभवेसुं देवुत्तरकुरुवंसपसूएसु । उववाए ण य तित्तो न य नरविज्जाहरसुरेसु ॥६०॥

---

स्तृप्तिम् ॥ ५२ ॥ आहारनिमित्तमहं सर्वेषु नरकलोकेषु । उत्पन्नोऽस्मि च बहुशः सर्वासु च म्लेच्छजातिषु ॥ ५३ ॥ आहारनिमित्तं मत्स्या गच्छन्ति दारुणे नरके । सचित्त आहारो न क्षमो मनसाऽपि प्रार्थयितुम् ॥ ५४ ॥ तृणकाष्ठेनाग्निरिव लवणोदो नदीसहस्रैरिव । नायं जीवः शक्यस्तर्पयितुं कामभोगैः ॥ ५५ ॥ तृण० । अर्थसारेण ॥ ५६ ॥ तृण० । भोजनविधिना ॥ ५७ ॥ वडवामुखसमानो दुष्पारो नरक इवापरिमेयः । नायं० गन्धमाल्यैः ॥ ५८ ॥ अविदग्धो(अवितृप्तो)ऽयं जीवोऽतीतकाले आगमिष्यति । शब्दानां रूपाणां गन्धानां रसानां स्पर्शानाम् ( भोगेषु ) ॥ ५९ ॥ कल्पतरुसंभवेषु देवकुरूत्तरकुरुवर्षप्रसूतेषु । उपपातेन च तृप्तो न च नरविद्याधरसुरेषु ॥६०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||६१||

दीप
अनुक्रम
[६१]

२ आतुरप्रत्याख्याने ॥ १४ ॥

आहारादिभिरतृप्तिः ५३-६८

॥ १९३ ॥ खइएण व पीएण व न य एसो ताइओ हवइ अप्पा । जइ दुग्गइं न वच्चइ तो नूणं ताइओ होइ ॥ ६१ ॥ १९४ ॥ देविंदचक्कवट्टित्तणाइं रज्जाइं उत्तमा भोगा । पत्ता अणंतखुत्तो न यऽहं तित्तिं गओ तेहिं ॥६२॥ ॥१९५॥ खीरदगेच्छुरसेसुं साऊसु महोदहीसु बहुसोऽवि । उववण्णो ण य तण्हा छिन्ना भे (मे) सीयलजलेणं ॥ ६३ ॥ १९६ ॥ तिविहेण य सुहमउलं तम्हा कामरइविसयसुक्खाणं । बहुसो सुहमणुभूयं न य सुहतण्हा परिच्छिण्णा ॥ ६४ ॥ १९७ ॥ जा काइ पत्थणाओ कया मए रागदोसवसयेण । पडिबंधेण बहुविहं तं निंदे तं च गरिहामि ॥ ६५ ॥ १९८ ॥ हंतूण मोहजालं छित्तूण य अट्ठकम्मसंकलियं । जम्मणमरणऽरहट्टं भित्तूण भवा विमुच्चिहिसि ॥ ६६ ॥ १९९ ॥ पंच य महव्वयाइं तिविहं तिविहेण चारुहेऊणं । मणवयणकायगुत्तो सज्जो मरणं पडिच्छिज्जा ॥ ६७ ॥ २०० ॥ कोहं माणं मायं लोहं पिज्जं तहेव दोसं च । चइऊण अप्पमत्तो

खादितेन वा पीतेन वा न चैष त्रातो भवत्यात्मा । यदि दुर्गतिं न व्रजति तदा नूनं त्रातो भवति ॥ ६१ ॥ देवेन्द्रचक्रवर्त्तित्वानि राज्यानि उत्तमा भोगाः । प्राप्ता अनन्तकृत्वो न चाहं तृप्तिं गतस्तैः ॥ ६२ ॥ क्षीरोदधीक्षुरसेषु स्वादिष्टेषु महोदधिषु बहुशोऽपि । उत्पन्नो न च तृष्णा छिन्ना भवतां (मम) शीतलजलेन ॥६३॥ त्रिविधेन च सुखमतुलं तस्मात्कामरतिविषयसौख्यानाम् । बहुशः सुखमनुभूतं न च सुखतृष्णा परिच्छिन्ना ॥६४॥ याः काश्चित्प्रार्थनाः कृता मया रागद्वेषवशगेन । प्रतिबन्धेन बहुविधेन तन्निन्दामि तच्च गर्हे ॥६५॥ हत्वा मोहजालं छित्त्वा चाष्ट कर्माणि सङ्कलितानि । जन्ममरणारहट्टं भित्त्वा भवाद्विमोक्ष्यसे ॥ ६६ ॥ पञ्च च महाव्रतानि त्रिविधत्रिविधेनारुह्य । ॥ १४ ॥
मनोवचनकायगुप्तः सद्यो मरणं परिच्छिन्द्यात् (प्रतीच्छेत्) ॥६७॥ क्रोधं मानं मायां लोभं प्रेम तथैव द्वेषं च । त्यक्त्वाऽप्रमत्तो रक्षामि महाव्र-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथ पंच-महाव्रत-रक्षार्थे विविध-उपदेशवचन प्ररुप्यते

प्रत
सूत्रांक
||६८||

दीप
अनुक्रम
[६८]

रक्खामि महव्वए पंच ॥ ६८ ॥ २०१ ॥ कलहं अब्भक्खाणं पेसुण्णंपि य परस्स परिवायं। परिवज्जंतो गुत्तो रक्खामि महव्वए पंच ॥ ६९ ॥ २०२ ॥ पंचिंदियसंवरणं पंचेव निरुंभिऊण कामगुणे । अच्चासायणभीओ रक्खामि महव्वए पंच ॥७०॥ २०३ ॥ किण्हानीलाकाऊलेसा झाणाइं अट्टरुद्दाइं। परिवज्जंतो गुत्तो रक्खामि महव्वए पंच ॥ ७१ ॥ २०४ ॥ तेऊपम्हासुक्कालेसा झाणाइं धम्मसुक्काइं । उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥ ७२ ॥ २०५ ॥ मणसा मणसच्चविऊ वायासच्चेण करणसच्चेण । तिविहेणवि सच्चविऊ रक्खामि महव्वए पंच ॥ ७३ ॥ २०६ ॥ सत्तभयविप्पमुक्को चत्तारि निरुंभिऊण य कसाए । अट्ठमयट्ठाणजढो रक्खामि महव्वए पंच ॥ ७४ ॥ २०७ ॥ गुत्तीओ समिईं भावणाओ नाणं च दंसणं चेव। उवसंपन्नो जुत्तो रक्खामि महव्वए पंच ॥७५॥२०८॥ एवं तिदंडविरओ तिकरणसुद्धो तिसल्लनिस्सल्लो। तिविहेण अप्पमत्तो रक्खामि

---

तानि पञ्च ॥ ६८ ॥ कलहमभ्याख्यानं पैशून्यमपि च परस्य परिवादम् । परिवर्जयन् गुप्तो रक्षामि० ॥ ६९ ॥ पञ्चेन्द्रियसंवरणं (कृत्वा) पञ्चैव निरुध्य कामगुणान् । अत्याशातनाभीतो रक्षामि० ॥ ७० ॥ कृष्णानीलाकापोतीलेश्या ध्याने आर्त्तरौद्रे। परि० ॥ ७१ ॥ तैजसीपद्माशुक्लालेश्या ध्याने धर्म्यशुक्ले । उपसंपन्नो युक्तो रक्षामि० ॥ ७२ ॥ मनसा मनःसत्यवित् वाक्सत्येन करणसत्येन । त्रिविधेनापि सत्यवित् रक्षामि० ॥ ७३ ॥ सप्तभयविप्रमुक्तश्चतुरो निरुध्य च कषायान् । त्यक्ताष्टमदस्थानो रक्षामि० ॥ ७४ ॥ गुप्तीः समितीर्भावना ज्ञानं च दर्शनं चैव । उपसंपन्नो युक्तो रक्षामि० ॥७५॥ एवं त्रिदण्डविरतस्त्रिकरणशुद्धस्त्रिशल्यनिःशल्यः । त्रिविधेनाप्रमत्तो रक्षामि०॥७६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||७६||

दीप अनुक्रम [७६]







महव्वए पंच ॥ ७६ ॥ २०९ ॥ संगं परिजाणामि सल्लं तिविहेण उद्धरेऊणं । गुत्तीओ समिईओ मज्झं ताणं च सरणं च ॥ ७७ ॥ २१० ॥ जह खुहियचक्कवाले पोयं रयणभरियं समुद्दंमि । निज्जामगा धरिंती कयकरणा बुद्धिसंपण्णा ॥ ७८ ॥ २११ ॥ तवपोयं गुणभरियं परीसहुम्मीहि खुहियमारद्धं । तह आराहिंति विऊ उवएसवलंबगा धीरा ॥ ७९ ॥ २१२ ॥ जइ ताव ते सुपुरिसा आयारोवियभरा निरवयक्खा । पब्भारकंदरगया साहिंती अप्पणो अट्ठं ॥ ८० ॥ २१३ ॥ जइ ताव ते सुपुरिसा गिरिकंदरकडगविसमदुग्गेसु । धिइधणियबद्धकच्छा साहिंती अप्पणो अट्ठं ॥ ८१ ॥ २१४ ॥ किं पुण अणगारसहायगेण अण्णुण्णसंगहबलेणं । परलोए णं सक्को साहेउं अप्पणो अट्ठं ? ॥ ८२ ॥ २१५ ॥ जिणवयणमप्पमेयं महुरं कण्णाहुइं सुणंतेणं । सक्को हु साहुमज्झे साहेउं अप्पणो अट्ठं ॥ ८३ ॥ २१६ ॥ धीरपुरिसपणत्तं सप्पुरिसनिसेवियं परमघोरं । धन्ना

---

सङ्गं परिजानामि शल्यं त्रिविधेनोद्धृत्य । गुप्तयः समितयश्च मम त्राणं च शरणं च ॥ ७७ ॥ यथा क्षुभितचक्रवाले पोतं रत्नभृतं समुद्रे । निर्यामका धारयन्ति कृतकरणा बुद्धिसंपन्नाः ॥७८॥ तपःपोतं गुणभृतं परीषहोर्मीभिः क्षोभितुमारब्धम् । तथाऽऽराधयन्ति विद उपदेशावलम्बका धीराः ॥७९॥ यदि तावत्ते सुपुरुषा आत्मारोपितभरा निरपेक्षाः । प्राग्भारकन्दरगताः साधयन्त्यात्मनोऽर्थम् ॥८०॥ यदि तावत्ते सुपुरुषा गिरिकन्दरकटकविषमदुर्गेषु । धृतिगाढबद्धकक्षाः साध०ऽर्थम् ॥८१॥ किं पुनरनगारसहायकेन अन्यान्यसङ्ग्रहबलेन । अपरलोकेन (न) शक्यः साध० ॥८२॥ जिनवचनमप्रमेयं मधुरं कर्णाभ्यां (कर्णाभृति) शृण्वता । शक्यः (न) साधुमध्ये साध०ऽर्थम् ? ॥८३॥ धीरपुरुष-

॥ १५ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||८४||

दीप
अनुक्रम
[८४]

सिलायलगया साहिंती अप्पणो अट्ठं ॥ ८४ ॥ २१७ ॥ बाहिंति इंदियाइं पुवमकारियपइण्णचारीणं । अक-
यपरिकम्मकीवा मरणे सुहसंगतायंमि ॥ ८५ ॥ २१८ ॥ पुवमकारियजोगो समाहिकामो अ मरणकालंमि । न
भवइ परीसहसहो विसयसुहसमुइओ अप्पा ॥ ८६ ॥ २१९ ॥ पुव्विं कारियजोगो समाहिकामो य मरण-
कालंमि । स भवइ परीसहसहो विसयसुहनिवारिओ अप्पा ॥ ८७ ॥ २२० ॥ पुव्विं कारियजोगो अनियाणो
ईहिऊण मइपुवं । ताहे मलियकसाओ सज्जो मरणं पडिच्छिज्जा ॥ ८८ ॥ २२१ ॥ पावीणं पावाणं कम्माणं
अप्पणो सकम्माणं । सक्का पलाइउं जे तवेण सम्मं पउत्तेणं ॥ ८९ ॥ २२२ ॥ इक्कं पंडियमरणं पडिवज्जिय
सुपुरिसो असंभंतो । खिप्पं सो मरणाणं काही अंतं अणंताणं ॥ ९० ॥ २२३ ॥ किं तं पंडियमरणं? काणि

---

प्रज्ञप्तं सत्पुरुषनिसेवितं परमघोरम् । धन्याः शिलातलगता साधयन्त्यात्मनोऽर्थम् ॥ ८४ ॥ बाधयन्तीन्द्रियाणि पूर्वमकारितप्रकीर्णचा-
रिणाम् । अकृतपरिकर्माणः क्लीबा (आत्मानः) मरणे सुखसङ्गत्यागे (वाये) ॥ ८५ ॥ पूर्वमकारितयोगः समाधिकामश्च मरणकाले ।
न भवति परीषहसहिष्णुर्विषयसुखसमुचित आत्मा ॥ ८६ ॥ पूर्वं कारितयोगः समाधिकामश्च मरणकाले । संभवति परीषहसहो
निवारितविषयसुख आत्मा ॥ ८७ ॥ पूर्वं कारितयोगोऽनिदान ईहित्वा मतिपूर्वम् । तदा मर्दितकषायः सद्यो मरणं प्रतीच्छेत् ॥ ८८ ॥
पापानां पापेभ्यः कर्मभ्य आत्मनः सकर्मभ्यः (स्वकृतेभ्यः) । शक्यः पलायितुं तपसा सम्यक्प्रयुक्तेन ॥८९॥ एकं पण्डितमरणं प्रतिपद्य
सुपुरुषोऽसंभ्रान्तः । क्षिप्रं स मरणानां करिष्यत्यन्तमनन्तानाम् ॥९०॥ किं तत्पण्डितमरणं? कानि वाऽऽलम्बनानि भणितानि? । एतानि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किं पंडितमरणं? इत्यादि प्रज्ञाप्यते

प्रत
सूत्रांक
||९१||

दीप
अनुक्रम
[९१]

३ महाप्रत्याख्यानं ॥ १६ ॥

व आलंबणाणि भणियाणि? । एयाइं नाऊणं किं आयरिया पसंसंति? ॥ ९१ ॥ २२४ ॥ अणसणपाओवगमं आलंबणझाणभावणाओ अ । एयाइं नाऊणं पंडियमरणं पसंसंति ॥ ९२ ॥ २२५ ॥ इंदियसुहसाउलओ घोरपरीसहपराइयपरज्झो । अकयपरिकम्मकीवो मुज्झइ आराहणाकाले ॥ ९३ ॥ २२६ ॥ लज्जाइ गारवेण य बहुसुयमएण वावि दुच्चरियं । जे न कहंति गुरूणं न हु ते आराहगा हुंति ॥ ९४ ॥ २२७ ॥ सुज्झइ दुक्करकारी जाणइ मग्गंति पावए कित्तिं । विणिगूहिंतो णिंदइ तम्हा आराहणा सेया ॥ ९५ ॥ २२८ ॥ नवि कारणं तणमओ संथारो नवि य फासुया भूमी । अप्पा खलु संथारो होइ विसुद्धो मणो जस्स ॥९६॥२२९॥ जिणवयणअणुगया मे होउ मई झाणजोगमल्लीणा । जह तंमि देसकाले अमूढसन्नो चयइ देहं ॥९७॥२३०॥ जाहे होइ पमत्तो जिणवयण (सइ) रहिओ अणाइत्तो । ताहे इंदियचोरा करिंति तवसंजमविलोमं ॥९८॥२३१॥

परिकर्म-दुष्कृतगर्हा श्रुतमानः ८४-९८

---

ज्ञात्वा किमाचार्याः प्रशंसन्ति? ॥ ९१ ॥ अनशनंपादपोपगमनमालम्बनं ध्याने भावनाश्च । एतानि ज्ञात्वा पण्डितमरणं प्रशंसन्ति ॥ ९२ ॥ इन्द्रियसुखसाताकुलो घोरपरीषहपराजितापराद्धः । अकृतपरिकर्मा क्लीबो मुह्यत्याराधनाकाले ॥ ९३ ॥ लज्जया गौरवेण च बहुश्रुतमदेन वाऽपि दुश्चरितम् । ये न कथयन्ति गुरुभ्यो नैव ते आराधका भवन्ति ॥ ९४ ॥ शुध्यति दुष्करकारी जानाति मार्गमिति प्राप्नोति कीर्त्तिम् । विनिगूहानो निन्दति ( विनिगूहमानो निन्द्यते ) तस्मादाराधना श्रेयसी ॥ ९५ ॥ नैव कारणं तृणमयः संस्तारकः, नैव च प्रासुका भूमिः । आत्मैव संस्तारको भवति विशुद्धं मनो यस्य ॥ ९६ ॥ जिनवचनमनुगता मम भवतु मतिर्ध्यानयोगमाश्रिता । यथा तस्मिन् देशकालेऽमूढसञ्ज्ञस्त्यजेयं देहम् ॥९७॥ यदा भवति प्रमत्तो जिनवचन (स्मृति) रहितोऽनायत्तः । तदेन्द्रियचौराः कुर्वन्ति तपःसंयम- ॥ १६ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||९९||

दीप
अनुक्रम
[९९]

मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] "महाप्रत्याख्यान" मूलं एवं संस्कृतछाया

जिणवयणमणुगयमई जं वेलं होइ संवरपविट्ठो। अग्गीव वाउसहिओ समूलडालं डहइ कम्मं ॥ ९९ ॥ २३२ ॥
जह डहइ वाउसहिओ अग्गी रुक्खे विहरि वणखंडे। तह पुरिसकारसहिओ नाणी कम्मं खयं णेई ॥ १०० ॥
॥ २३३ ॥ जं अन्नाणीकम्मं खवेइ बहुआहिं वासकोडीहिं। तं नाणी तिहिं गुत्तो खवेइ ऊसासमित्तेणं ॥ १०१ ॥
॥ २३४ ॥ न हु मरणंमि उवग्गे सक्को बारसविहो सुयक्खंधो। सव्वो अणुचिंतेउं धणियंपि समत्थचित्तेणं
॥ १०२ ॥ २३५ ॥ इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए। सो तेण मोहजालं छिंदइ अज्झप्पओगेणं
॥ १०३ ॥ २३६ ॥ इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए। तं तस्स होइ नाणं जेण विरागत्तणमु-
वेइ ॥ १०४ ॥ २३७ ॥ इक्कंमिवि जंमि पए संवेगं कुणइ वीयरायमए। वच्चइ नरो अभिक्खं तं मरणं तेण
मरियव्वं ॥ १०५ ॥ २३८ ॥ जेण विरागो जायइ तं तं सव्वायरेण कायव्वं। मुच्चइ हु संवेगी अणंतओ होइ असं-

---

विलोम(प)म् ॥९८॥ जिनवचनानुगतमतियों वेलां (यावत्) भवति संवरप्रविष्टः। अग्निरिव वायुसहितः समूलशाखं दहति कर्म(वृक्षम्)
॥ ९९ ॥ यथा दहति वायुसहितोऽग्निर्विहृत्य वनखण्डे। तथा पुरुषकारसहितो ज्ञानी कर्म क्षयं नयति ॥ १०० ॥ यत् अज्ञानी कर्म
क्षपयति बहुकाभिर्वर्षकोटीभिः। तज्ज्ञानी त्रिभिर्गुप्तः क्षपयत्युच्छ्वासमात्रेण ॥ १०१ ॥ नैव मरणे उपामे शक्यो द्वादशविधः श्रुतस्कन्धः।
सर्वोऽनुचिन्तयितुं बाढमपि समर्थचित्तेन ॥१०२॥ एकस्मिन्नपि यस्मिन् पदे संवेगं करोति वीतरागमते। स तेन मोहजालं छिनत्त्यध्यात्मयो-
गेन ॥ १०३ ॥ एकस्मिन्नपि यस्मिन् पदे संवेगं करोति वीतरागमते। तत्तस्य भवति ज्ञानं येन विरागत्वमुपैति ॥१०४॥ एकस्मिन्न० ।
व्रजति नरोऽभीक्ष्णं तन्मरणं तेन मर्त्तव्यम् ॥ १०५ ॥ येन विरागो जायते तत्तत् सर्वादरेण कर्त्तव्यम्। मुच्यते संवेगेन

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत सूत्रांक ||१०६||

दीप अनुक्रम [१०६]

मुनि दीपरत्नसागरेण संकलित..........आगमसूत्र - [२६], प्रकीर्णकसूत्र - [०३] “महाप्रत्याख्यान” मूलं एवं संस्कृतछाया

३ महाप्रत्याख्यानं ॥ १७ ॥

वेगी ॥ १०६ ॥ २३९ ॥ धम्म जिणपन्नत्त सम्मामेण सद्दहामि तिविहेणं । तसथावरभूअहियं पंथं निव्वाणनगरस्स ॥ १०७ ॥ २४० ॥ समणोमित्ति य पढमं बीयं सव्वत्थ संजओ मित्ति । सव्वं च वोसिरामि जिणेहिं जं जं च पडिकुट्ठं ॥ १०८ ॥ २४१ ॥ उवही सरीरगं चेव, आहारं च चउव्विहं । मणसावयकाएणं, वोसिरामित्ति भावओ ॥१०९॥२४२॥ मणसा अचिंतणिज्जं सव्वं भासाइ अभासणिज्जं च । काएण अकरणिज्जं सव्वं तिविहेण वोसिरे ॥ ११० ॥ २४३ ॥ अस्संजमत्तोगसणं ( अस्संजमे वेरमणं ) उवही विवेगकरणं उवसमो (य) । अप्पडिरुयजोगविरओ खंती मुत्ती विवेगो अ ॥ १११ ॥ २४४ ॥ एयं पच्चक्खाणं आउरजण आवईसु भावेण । अण्णयरं पडिवण्णो जंपंतो पावइ समाहिं ॥ ११२ ॥ २४५ ॥ एयंसि निमित्तंमी पच्चक्खाऊण जइ करे कालं । तो पच्चखाइयव्वं इमेण इक्केणवि पएणं ॥ ११३ ॥ २४६ ॥ मम मंगलमरिहंता सिद्धा साहू सुयं च धम्मो य ।

वैराग्यहेतुः व्युत्सर्जनं च९९-११३

अनन्तगो भवत्रसंविग्नः ॥ १०६ ॥ धर्मं जिनप्रज्ञप्तं सम्यग् इमं श्रद्दधे त्रिविधेन । त्रसस्थावरभूतहितं पन्थानं निर्वाणनगरस्य ॥ १०७ ॥ श्रमणोऽस्मीति च प्रथमं द्वितीयं सर्वत्र संयतोऽस्मीति । सर्वं च व्युत्सृजामि जिनैर्यद् यच्च प्रतिकुष्टम् ॥ १०८ ॥ उपधिं शरीरमेव आहारं च चतुर्विधम् । मनोवाक्कायैर्व्युत्सृजामि इति भावतः ॥१०९॥ मनसाऽचिन्तनीयं सर्वं भाषयाऽभाषणीयं च । कायेनाकरणीयं सर्वं त्रिविधेन व्युत्सृजामि ॥११०॥ असंयमत्वापकषणं ( असंयमाद्विरमणं ) उपधिविवेककरणमुपशमः (च) । अप्रतिरूपयोगविरतः क्षान्तिर्मुक्तिर्विवेकश्च ॥ १११ ॥ एतत्प्रत्याख्यानमातुरजन आपत्सु भावेन । अन्यतरत्प्रतिपन्नो जल्पन् (यत् प्राप्तः) प्राप्नोति समाधिम् ॥११२॥ एतस्मिन् निमित्ते प्रत्याख्याय यदि ( यतिः ) करोति कालम् । तत् प्रत्याख्यातव्यमनेनैकेनापि पदेन ॥ ११३ ॥ मम मङ्गलमर्हन्तः सिद्धाः साधवः ॥ १७ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||११४||

दीप
अनुक्रम
[११४]

तेसिं सरणोवगओ सावज्जं वोसिरामित्ति ॥ ११४ ॥ २४७ ॥ अरहंता मंगलं मज्झ, अरहंता मज्झ देवया। अरहंते कित्तइत्ताणं, वोसिरामित्ति पावगं ॥ ११५ ॥ २४८ ॥ सिद्धा य मंगलं मज्झ, सिद्धा य मज्झ देवया। सिद्धे य कित्तइत्ताणं, वोसिरामित्ति पावगं ॥ ११६॥२४९ ॥ आयरिया मंगलं मज्झ, आयरिया मज्झ देवया। आयरिए कित्तइत्ताणं, वोसिरामित्ति पावगं ॥ ११७ ॥ २५० ॥ उज्झाया मंगलं मज्झ, उज्झाया मज्झ देवया। उज्झाए कित्तइत्ताणं, वोसिरामित्ति पावगं ॥ ११८ ॥ २५१ ॥ साहू य मंगलं मज्झ, साहू य मज्झ देवया। साहू य कित्तइत्ताणं, वोसिरामित्ति पावगं ॥ ११९ ॥ २५२ ॥ सिद्धे उवसंपण्णो अरहंते केवलित्ति भावेणं। इत्तो एगयरेणवि पएण आराहओ होइ ॥ १२० ॥ २५३ ॥ समुइण्णवेयणो पुण समणो हियएण किंपि चिंतिज्जा। आलंबणाइं काइं काऊण मुणी दुहं सहइ? ॥ १२१ ॥ २५४ ॥ वेयणासु उइन्नासु, किं मे सत्तं

श्रुतं च धर्मश्च। तेषां शरणमुपगतः सावद्यं व्युत्सृजामीति ॥ ११४ ॥ अर्हन्तो मङ्गलं मम अर्हन्तो मम देवताः। अर्हतः कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥ ११५ ॥ सिद्धाश्च मङ्गलं मम सिद्धाश्च मम देवताः। सिद्धांश्च कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥ ११६ ॥ आचार्या मङ्गलं मम आचार्या मम देवताः। आचार्यान् कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥ ११७ ॥ उपाध्याया मङ्गलं मम उपाध्याया मम देवताः। उपाध्यायान् कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥ ११८ ॥ साधवश्च मङ्गलं मम साधवश्च मम देवताः। साधूँश्च कीर्त्तयित्वा व्युत्सृजामीति पापकम् ॥ ११९ ॥ सिद्धानुपसंपन्नः अर्हतः केवलिन इति भावेन। एषामेकतरेणापि पदेनाराधको भवति ॥ १२० ॥ समुदीर्णवेदनः पुनः श्रमणो हृदये किमपि (किं वि) चिन्तयेत्। आलम्बनानि कानि कृत्वा मुनिर्दुःखं सहते? ॥१२१॥ वेदनासूदीर्णासु किं मम

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अरहंत आदीनाम् मंगलत्वं

प्रत
सूत्रांक
||१२२||

दीप
अनुक्रम
[१२२]

३ महाप्रत्याख्यानं ॥ १८ ॥

अर्हदादिशरणं पत्ताकाहरणं च ११४-२९

निवेयए। किं वाऽऽलंबणं किच्चा, तं दुक्खमहियासए? ॥ १२२ ॥ २५५ ॥ अणुत्तरेसु नरएसु, वेयणाओ अणुत्तरा। पमाए वट्टमाणेणं, मए पत्ता अणंतसो ॥ १२३ ॥ २५६ ॥ मए कयं इमं कम्मं, समासज्ज अबोहिअं। पोराणगं इमं कम्मं, मए पत्तं अणंतसो ॥ १२४ ॥ २५७ ॥ ताहिं दुक्खविवागाहिं, उवचिण्णाहिं तहिं तहिं। न य जीवो अजीवो उ, कयपुव्वो उ चिंतए ॥ १२५ ॥ २५८ ॥ अब्भुज्जुयं विहारं इत्थं जिणएसियं विउपसत्थं। नाउं महापुरिससेवियं अब्भुज्जुयं मरणं ॥ १२६ ॥ २५९ ॥ जह पच्छिमंमि काले पच्छिमतित्थयरदेसियमुयारं। पच्छा निच्छयपत्थं उवेमि अब्भुज्जुयं मरणं ॥ १२७ ॥ २६० ॥ बत्तीसमंडियाहिं कडजोगी जोगसंगहबलेणं। उज्जमिऊण य बारसविहेण तवणेहपाणेणं ॥ १२८ ॥ २६१ ॥ संसाररंगमज्झे धिइबलववसायबद्धकच्छाओ। हंतूण मोहमल्लं हराहि आराहणपडागं ॥ १२९ ॥ २६२ ॥ पोराणगं च कम्मं खवेइ

सत्त्वं (इति) निवेदयेत्। किं वाऽऽलम्बनं कृत्वा तद्दुःखमध्यास्ते ॥ १२२ ॥ अनुत्तरेषु नरकेषु वेदना अनुत्तराः। प्रमादे वर्त्तमानेन मया प्राप्ता अनन्तशः ॥ १२३ ॥ मया कृतमिदं कर्म समासाद्याबोधिकम्। पुराणमिदं कर्म मया प्राप्तमनन्तशः ॥ १२४ ॥ ताभिर्दुःखविपाकाभिरुपचीर्णाभिस्तत्र तत्र। न च जीवस्त्वजीवः कृतपूर्वस्तु (इति) चिन्तयेत् ॥ १२५ ॥ अभ्युद्यतं विहारमित्थं जिनदेशितं विद्वत्प्रशस्तम्। ज्ञात्वा महापुरुषसेवितमभ्युद्यतं मरणम् ॥ १२६ ॥ यथा पश्चिमे काले पश्चिमतीर्थकरदिष्टमुपकारम्। पश्चान्निश्चयपथ्यमुपयाम्यभ्युद्यतं मरणम् ॥१२७॥ द्वात्रिंशन्मण्डिकाभिः कृतयोगी योगसङ्ग्रहबलेन। उद्यम्य च द्वादशविधेन तपःस्नेहपानेन ॥१२८॥ संसाररङ्गमध्ये धृतिबलव्यवसायबद्धकच्छः। हत्वा मोहमल्लं हराराधनापताकाम् ॥ १२९ ॥ युग्मम्। पुराणं च कर्म क्षपयति अन्यन्नवं च न

॥ १८ ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

| आगम (२६) | “महाप्रत्याख्यान” - प्रकीर्णकसूत्र-३ (मूलं+संस्कृतछाया)<br>---------------------------------------- मूलं [१३०] ---------------------------------------- |
|---|---|



प्रत
सूत्रांक
||१३०||

दीप
अनुक्रम
[१३०]

अन्नं नवं च न चिणाइ । कम्मकलंकलवल्लिं छिंदइ संथारमारूढो ॥ १३० ॥ २६३ ॥ आराहणोवउत्तो सम्मं काऊण सुविहिओ कालं । उक्कोसं तिन्नि भवे गंतूण लभिज्ज निव्वाणं ॥ १३१ ॥ २६४ ॥ धीरपुरिसपन्नत्तं सप्पुरिसनिसेवियं परमघोरं । ओइण्णो हु सि रंगं हरसु पडायं अविग्घेणं ॥ १३२ ॥ २६५ ॥ धीर! पडागा-हरणं करेह जह तंमि देसकालंमि । सुत्तत्थमणुगुणंतो धिइनिच्चलबद्धकच्छाओ ॥ १३३ ॥ २६६ ॥ चत्तारि कसाए तिन्नि गारवे पंच इंदियग्गामे । हंता परीसहचमूं हराहि आराहणपडागं ॥ १३४ ॥ २६७ ॥ माऽऽया! हु व चिंतिज्जा जीवामि चिरं मरामि व लहुंति । जइ इच्छसि तरिउं जे संसारमहोअहिमपारं ॥१३५॥२६८॥ जइ इच्छसि नित्थरिउं सव्वेसिं चेव पावकम्माणं । जिणवयणनाणदंसणचरित्तभावुज्जुओ जग्ग ॥ १३६ ॥ ॥२६९॥ दंसणनाणचरित्तं तवे य आराहणा चउक्खंधा । सा चेव होइ तिविहा उक्कोसा मज्झिम जहन्ना ॥१३७॥

चिनाति । कर्मकलङ्कवल्लीं छिनत्ति संस्तारकमारूढः ॥ १३० ॥ आराधनोपयुक्तः सम्यक् कृत्वा सुविहितः कालम् । उत्कर्षतस्त्रीन् भवान् गत्वा लभते निर्वाणम् ॥ १३१ ॥ धीरपुरुषप्रज्ञप्तं सत्पुरुषनिषेवितं परमघोरम् । अवतीर्णोऽसि रङ्गे हर पताकामविघ्नेन ॥ १३२ ॥ धीर! पताकाहरणं कुरु यथा तस्मिन् देशकाले । सूत्रार्थमनुगुणयन् धृतिनिश्चलबद्धकच्छः ॥ १३३ ॥ चतुरः कषायान् त्रीणि गौरवाणि पञ्चे-न्द्रियग्रामम् । हत्वा परीषहचमूं हरा(हरिष्यस्या)राधनापताकाम् ॥ १३४ ॥ मा आत्मन्! चिन्तयेर्जीवामि चिरं म्रिये वा लघु इति । यदीच्छसि तरीतुं संसारमहोदधिमपारम् ॥ १३५ ॥ यदीच्छसि निस्तरीतुं सर्वेभ्य एव पापकर्मभ्यः । जिनवचनज्ञानदर्शनचारित्रभावोद्यतो जागृहि ॥ १३६ ॥ दर्शनज्ञानचारित्राणि तपश्चाराधना चतुःस्कन्धा । सा चैव भवति त्रिविधा उत्कृष्टा मध्यमा जघन्या ॥ १३७ ॥

च. स. ४

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रत
सूत्रांक
||१३८||

दीप
अनुक्रम
[१३८]

महाप्रत्याख्यानं भक्तपरिज्ञा

आराधना-फलं १३०-४२-१

॥ २७० ॥ आराहेऊण विऊ उक्कोसाराहणं चउक्खंधं । कम्मरयविप्पमुक्को तेणेव भवेण सिज्झिज्जा
॥ १३८ ॥ २७१ ॥ आराहेऊण विऊ जहन्नमाराहणं चउक्खंधं । सत्तट्ठभवग्गहणे परिणामेऊण सिज्झिज्जा
॥ १३९॥२७२ ॥ सम्मं मे सव्वभूएसु, वेरं मज्झ न केणइ । खामेमि सव्वजीवे, खमामऽहं सव्वजीवाणं ॥१४०॥
॥२७३॥ धीरेणवि मरियव्वं काऊरिसेणविऽवस्स मरियव्वं । दुण्हंपि य मरणाणं वरं खु धीरत्तणे मरिउं ॥१४१॥
॥ २७४ ॥ एयं पच्चक्खाणं अणुपालेऊण सुविहिओ सम्मं । वेमाणिओ व देवो हविज्ज अहवावि सिज्झिज्जा
॥ १४२ ॥ २७५ ॥ इति महापच्चक्खाणपइण्णं संमत्तं ॥ ३ ॥

॥ १९ ॥

---

आराध्य विद्वान् उत्कृष्टाराधनां चतुःस्कन्धाम् । कर्मरजोविप्रमुक्तस्तेनैव भवेन सिद्ध्येत् ॥१३८॥ आराध्य विद्वान् जघन्यामाराधनां चतुःस्कन्धाम् । सप्ताष्टभवग्रहणैः परिणम्य सिद्ध्येत् ॥ १३९ ॥ साम्यं मे सर्वभूतेषु वैरं मम न केनचित् । क्षमयामि सर्वजीवान् क्षाम्याम्यहं सर्वजीवानाम् ॥ १४० ॥ धीरेणापि मर्त्तव्यं कापुरुषेणापि अवश्यं मर्त्तव्यम् । द्वयोरपि मरणयोर्वरमेव धीरत्वेन मर्त्तुम् ॥ १४१ ॥ एतत्प्रत्याख्यानमनुपाल्य सुविहितः सम्यक् । वैमानिको वा देवो भवेत् अथवाऽपि सिद्ध्येत् ॥१४२॥ इति **महाप्रत्याख्यानप्रकीर्णकम्** ॥३॥

॥ १९ ॥

Jain Education International
www.jainelibrary.org

**मुनिश्री दीपरत्नसागरेण पुनः संपादितः (आगमसूत्र २६)**
**"महाप्रत्याख्यान" परिसमाप्तः**

**नमो नमो निम्मलदंसणस्स**

पूज्य आनंद-क्षमा-ललित-सुशील-सुधर्मसागर गुरूभ्यो नम:

**26**

पूज्य आगमोध्धारक आचार्य श्री सागरानंदसूरीश्वरेण संशोधित: संपादितश्च

**"महाप्रत्याख्यान-प्रकीर्णकसूत्र"** [मूलं एवं छाया:]

**(किंचित् वैशिष्ठ्यं समर्पितेन सह)**

# मुनि दीपरत्नसागरेण पुन: संकलित:

**"महाप्रत्याख्यान" मूलं एवं संस्कृतछाया:" नामेण**

# परिसमाप्त:

**Remember it's a Net Publications of 'jain_e_library's'**